# Shri Vighnaraja Stuti Devendrakrita

# દેવેન્દ્રાકૃતા શ્રીવિઘ્નરાજસ્તુતિઃ

## Document Information

Text title : Shri Vighnaraja Stuti Devendrakrita

File name : vighnarAjastutiHdevendrAkRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM saptamaH khaNDaH | adhyAyaH 6 | 7.6 19-32||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# દેવેન્દ્રાકૃતા શ્રીવિઘ્નરાજસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥

દેવેન્દ્રા ઊચુઃ ।

નમસ્તે વિઘ્નરાજાય ભક્તવિઘ્નવિદારણ ।

અભક્તેભ્યો વિશેષેણ વિઘ્નદાત્રે નમો નમઃ ॥ ૧૯॥

ગણેશાય પરેશાય હેરમ્બાય નમો નમઃ ।

ચતુર્બાહુધરાયૈવ નાગેશધ્વજિને નમઃ ॥ ૨૦॥

અમેયાયાપ્રતાર્ક્યાય સદા સ્વાનન્દવાસિને ।

બ્રહ્મણાં પતયે તુભ્યં બ્રહ્મદાત્રે નમો નમઃ ॥ ૨૧॥

સાઙ્ખ્યાય બોધરૂપાય પુરુષાય પરાત્મને ।

ગણેશાય પ્રકૃતયે ત્રિગુણાય નમો નમઃ ॥ ૨૨॥

સ્રષ્ટ્રે પાત્રે ચ સંહર્ત્રે પ્રકાશરૂપધારિણે ।

મોહકાય ત્રિલોકસ્થનાથાય તે નમો નમઃ ॥ ૨૩॥

નાનામાયાપ્રચાલાય માયિભ્યો માયયા પ્રભો ।

મોહદાય વિશેષેણ માયિકાય નમો નમઃ ॥ ૨૪॥

નાનાભેદમયં બ્રહ્મ વિઘ્નયુક્તં ન સંશયઃ ।

તત્રાનન્દયુતાયૈવ સમભાવાય તે નમઃ ॥ ૨૫॥

સર્વભેદવિહીનં યદ્બ્રહ્મામૃતમયં પરમ્ ।

ભેદહીનેન વિઘ્નેન યુતં શાસ્ત્રપ્રમાણતઃ ॥ ૨૬॥

ભેદયુક્તં ગણાધીશ ભેદહીનં ત્વયા પરમ્ ।

સૃષ્ટં દ્વન્દ્વમયં નાથ તયોર્નાથાય તે નમઃ ॥ ૨૭॥

આનન્દં પરમં બ્રહ્મ વિઘ્નાનાં હારકં મતમ્ ।

દાયકં તત્ત્વમેવેતિ વિઘ્નરાજ નમોઽસ્તુ તે ॥ ૨૮॥

તં વિઘ્નરાજરાજં તુ પશ્યામશ્ચર્મચક્ષુષા ।

ધન્યા વયં ગણાધીશ તવ પાદસ્ય દર્શનાત્ ॥ ૨૯॥

એવમુક્ત્વા પ્રણેમુસ્તે દેવાઃ શમ્ભુપુરોગમાઃ ।

સ તાનુવાચ વિઘ્નેશો ભક્ત્યા સ્તોત્રેણ યન્ત્રિતઃ ॥ ૩૦॥
(ફલશ્રુતિઃ)
શ્રીવિઘ્નરાજ ઉવાચ ।
વરાન્ બ્રૂત મહાદેવા યેષાં યાન્ મનસીપ્સિતાન્ ।
દાસ્યામિ સ્તોત્રસન્તુષ્ટસ્તપસા ધ્યાનશાલિના ॥ ૩૧॥
ભવત્કૃતમિદં સ્તોત્રં સર્વસિદ્ધિપ્રદં ભવેત્ ।
પઠતે શ‍ૃણ્વતે દેવા વાઞ્છિતાર્થપ્રદાયકમ્ ॥ ૩૨॥

ઇતિ દેવેન્દ્રાકૃતા શ્રીવિઘ્નરાજસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં સપ્તમઃ ખણ્ડઃ । અધ્યાયઃ ૬ । ૭.૬ ૧૯-૩૨॥

- .. mudgalapurANaM saptamaH khaNDaH . adhyAyaH 6 . 7.6 19-32..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Vighnaraja Stuti Devendrakrita*
pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*